वासिष्ठीशिक्षा

अथ शिक्षां प्रवक्ष्यामि वासिष्ठस्य मतं यथा
सर्वानुक्रममुद्धृत्य ऋग्यजुषोस्तु लक्षणम् १

अध्याये प्रथमे नवमेऽनुवाके पुराक्रूरस्येत्येका यजूंषि
सर्वे मन्त्राः सप्तदशोत्तरशतं यजूंषि प्रथमे १।११७

द्वितीयेऽध्याये व्वीतिहोत्रमित्येषा तेऽग्न इति मरुतांपृषतीरिति यम्परिधिमिति यजुरन्ताग्नेः प्रियं यजुः
सँस्त्रवभागा इति यजुरन्ता स्वाहा व्वाडितियजुरेकेन सह मन्त्रं देवागातुविद इति द्वे
सँव्वर्च्चसेति ये रूपाण्याधत्तेति द्वे द्वे द्वितीये
द्वादशैवार्चः षट्सप्ततिर्यजूंषि १२।७६

तृतीयेऽध्याये समिधाग्निमिति चतस्र आयङ्गौरिति तिस्रोऽग्निर्ज्ज्योतिरिति सप्त गायत्र्यः पूर्वाः पञ्चैकपदान्तरे त्रिपदे उपप्रयन्त इतिषडिन्धाना इति त्र्यवसाना महापङ्क्तिरूपाश्चेति सप्तगायत्र्य अध्यायास्तिस्रस्त्रिपदा उत्तराश्च- तस्रो द्विपदाः सोमानमिति नवागन्मेति तिस्रो गृहा मेति
चतस्र उपहूता इति त्र्यवसाना महापङ्क्तिः प्रघासिन इति चतस्रः पूर्णा दर्व्वि द्वे अक्षन्नमीमदन्तेति षडेव रुद्रमिति चतस्र एतत्ते रुद्रेत्येकास्तारपङ्क्तिर्जप- यजुरित्येके आयुषमित्येषा तृतीये ऋत्वस्त्रिषष्टिर्द्वाषष्टिर्वा चतुस्त्रिंशत् षट्- त्रंशद्वा यजूंषि ६३।३६

चतुर्थेऽध्याये एदमिति द्वे अत्यष्टी त्र्यवसाने
आव इत्येकापो देवीरिति विश्वो देवस्येति

दैवीन्धियमिति श्वात्राः पीता इति चाग्ने त्वमिति
त्वमग्ने व्वरव्यसि समरव्ये अभिन्त्यमित्यैकैका

परिमाग्ने इति द्वे अस्तभ्ना द्यामिति चतस्रोनमो मित्रस्येत्येका या ते धा-

मानीति चैका चतुर्थे एकविंशतिर्विंशतिर्वा पञ्चषष्टिर्य्यजूँषि षट्षष्टिर्वा २१।६६

पञ्चमेऽध्याये भवतन्न इति द्वे अंशुरंशुरितिप्रकृतिश्चतुरवसाना युञ्जत इति तिस्रो व्विष्णोर्न्नुकमिति तिस्रः पूर्वे यजुरन्ते व्विष्णवे त्वेतियजुरुभयतः परित्वेत्येका त्वं सोमेति पञ्चाद्या गायत्र्यनवसाना जुषाण इत्येकपदा विराड्यजुरन्तोरु व्विष्णो इत्येषा बारद्वयं पञ्चमेसप्तदशर्च्चः पञ्चशोतरशतानि यजूँषि १७।११५

षष्ठेऽध्याये या ते धामानीत्येका व्विष्णोःकर्म्माणीति द्वे इदमापो महापङ्क्तिस्त्र्यवसानादेवत्त्वष्टरित्येका यदाहुरग्घ्न्या इत्यवसानागायत्री चैका हविष्मतीरित्येका अमूर्य्या इत्येकाह्रदे त्वा शृणोत्त्वग्निरिति चतस्रो षत्ते सोमेति द्वेप्रागपागिति द्वे षष्ठे ऋचः सप्तदश अशीतिर्यजूँषि १७।८३

सप्तमेऽध्याये वाचस्पतये इत्येकान्तस्ते इत्येकाव्वायविति षडयजुरन्ता सा यमेत्येकायैव्वेन इतियजुरन्ते ये देवास इत्येका मूर्धानमित्येकाध्रुवन्ध्रुवे-णेति द्वे कोऽसीत्येका इन्द्राग्नी आगतमितिदश यजुरन्ता उदुत्यमिति चतस्रः सप्त ऋचस्त्रिंशदेकादशोत्तरयजूँषि ३०।१११

अष्टमेऽध्याये कदा चनेति तिस्रो यजुरन्तादित्येभ्यस्त्वेति यजु अदस्म्मा इति द्वे अहं परस्तादित्येका समिन्द्रेति सप्तीरुं हीत्येकाग्नेरनीकमिति तिस्र एजतु द्वे पूर्वा त्र्यवसानामहापङ्क्तिर्म्मरुतो यस्येति द्वे आतिष्ठेतियजुरन्तास्तिस्रो यस्मान्नेति द्वे द्वितीया यजुरन्तासह प्प्राणेनेति यजुरग्ने पवस्वेति चतस्रोयजुरन्ताजिघ्रेति द्वे व्विन इन्द्रेति व्वाचस्प्पतिमिति द्वे तिस्रोऽपि यजुरन्ता उपसृजन्निति द्वेयुवन्तमिति त्र्यवसानेऽत्यष्टिर्य्ययोरोजमित्येकाचतुस्त्रिंशत्तन्त्व इति तिस्रोऽष्टमे त्रिचत्वारिंशत्यो यजूँषि त्रिचतुरुत्तरंशतम् ४३।१०४

नवमेऽध्याये देवसवितरित्येकापाँरसमितियजुरन्ते व्वाजस्यन्वित्येकाप्स्वन्तरवसानापुरउष्णिगिति व्वातो वेति तिस्र एषस्येतिषड्वाजस्येय-मिति सप्ताग्ने सहस्वेति चैका नवमेऋृचो द्वाविंशतिर्यजूँषि चतुरशीतिः

२२ ।८४

दशमेऽध्यायेऽपोदेवा इत्येका सधमाद इत्येका हिरण्यरूपावित्येका यजु-रन्ता मित्रोऽसि वरुणोऽसि यजु
प्रपर्व्वतस्येत्येका प्रजापतेनेत्येवयजुर्म्मध्यायममुष्ययजुर्म्मात इन्द्रेत्येका हं-स इत्येका निषसादेत्येका व्वायुः पूत इति चतस्रोदशमे ऋचो द्वादश य-जूँषि द्विरुत्तरशतम् १२।१०२

एकादशेऽध्याये युञ्जान इत्यष्टौ ऋचास्तोममित्यनवसाना गायत्री हस्ता-धायेत्येकायजुरन्तानुष्टुभेनेति यजुः प्रतूर्तमिति चतस्रोऽन्त्यायजुर्ग्गर्ब्भोर्ब्व-न्तरिक्षमिति यजुरन्वग्निरित्येकादशापाम्पृष्ठमिति तिस्रस्त्वामग्नति षडपो देवीरिति दश नवमी त्र्यवसानान्त्यैकपदौषधय इति तिस्रापोहिष्ठेति तिस्रो मित्र इति पञ्चकृत्त्वायेत्येका मित्त्रस्येति तिस्रो विश्वोदेवस्याध्याया-न्ताः सप्तदशैकादशे ऋचःषट्सप्ततिर्य्यजूँषि षड्विंशतिः ७६।२६

द्वादशेऽध्याये ऋचां बाहुल्याद्यजूँषि दोग्ध्रयन्तेशेषा ऋचो व्विष्णोः क्रमो-ऽसीति चत्वारि हंसः शुचिषदित्यृक्त्वाद्यजुः स बोधि सूरिरित्यन्ते ।
विश्वकर्म्मणे स्वाहेति यजुः सञ्ज्ञानमसीत्यग्नेर्भस्मासीति चितस्थेति चिद-सीति द्वे सजूरब्द इति । शेषाश्चतुर्दशोत्तरं शतमृचस्तत्र सुपर्णोऽसि चतुरव-सानाकृतिर्न्नमो भूत्या इति विराडेकपदा द्वादशयजूँषि द्वादशे ऋचश्चतुर्द-शोत्तरंशतम् १२।११४

त्रयोदशेऽध्याये मयि गृह्णामि इति चतस्रोऽपाठासीत्येका मधुव्वाता इत्ये-कादश सम्यक्स्रवन्तीतिनवेमम्माहिंसीरिति षडाद्यानां पञ्चानान्तेषु द्वे द्वे य-जूँष्यध्यायान्ते लोकन्ता इन्द्रमिति तिस्रः प्रतीकोक्ता लोकम्पृण तास्येन्द्रँ व्विश्श्वा इति त्रयोदशे ऋचो द्वापञ्चाशद्यजूँषि सप्ताशीतिः ५२।८७

चतुर्दशेऽध्याये ध्रुवक्षितिरिति पञ्च चतस्रो यजुरन्ता मूर्द्धा व्वय इत्यनुवाका-न्ते लोकन्ता इन्द्रमिति तिस्र इन्द्राग्नी इत्येका मूर्द्धासीति द्वेतयोर्मध्ये चतुर्द-श यजूँषि छन्दोबन्धेन संगृह्यसम्पद्यन्ते लोकन्ता इन्द्रमिति तिस्रश्चतुर्दशेप्र-

तीकोपादानं वर्ज्जयित्वा ऋचोऽष्टौ सह सप्तदशयजूँषि चतुःपञ्चाशदुत्तरंशतम् १७।१५४

पञ्चदशेऽध्यायेऽग्नेजातानिति द्वे अग्नेः पुरीषमित्ये काग्निर्म्मूर्द्धेत्येकत्रिंशत्तत्राग्निंहोतारमिति त्र्यवसानाग्ने त्वन्न इति द्विपदास्तिस्रो येन ऋषयोऽष्टौ लोकम्पृणेति चतस्रः पञ्चदशे ऋचः षट्चत्वारिंशद्यजूँषि नवतिः ४६।९०

षोडशेऽध्याये नमस्त इति षोडश द्रापेऽन्धसस्प्पतइति सप्तदश षोडशे ऋचस्त्रयस्त्रिंशदुत्तरंशतम् ३३।१२९

सप्तदशेऽध्यायेऽश्मन्नूर्ज्जमिति चत्वारीमामेऽग्न इत्येकं नृषदे वेडिति पञ्चैन्द्रं दैवीरित्येकमित्युद्धृतानि यजूँषि एकादशर्च्चः पञ्चनवतिः ११।९५

अष्टादशेऽध्याये वाजस्य न्विति सप्त स नोभुवनस्येत्येका यास्त इति चतस्रोऽग्निं युनज्ज्मीत्याध्यायान्त ऋचो नामेत्युद्धृत्य यजुर्य्यजुरेकोऽपरं सप्तविंशतिरष्टादशे ऋचः षट्त्रिंशद्यजूँष्यष्टषष्टिस्त्रीणि शतानि ३६।३६८

एकोनविंशेऽध्याये स्वाद्द्वीन्त्वा यजुरित्येकापरीत इति चतस्रो ब्रह्मक्षत्रमिति द्वे नानाहीत्येकाया व्याघ्रमिति आध्यायान्ताश्चतुरशीतिः पितृभ्य इत्युद्धृत्य तवेदं हविरिति त्र्यवसानामहापङ्क्ती रेतोमूत्रमिति द्वे त्र्यवसाने अवसानेऽप्यकरी एकोनविंशे ऋचश्चतुर्णवतिर्य्यजूँषित्रिंशत् ९४।३०

विंशतितमेऽध्याये क्षत्रस्य योनिर्द्विपदा गायत्रीनिषसादेत्येका कोऽसीति षडन्त्या त्र्यवसानामहापङ्क्तिस्त्रयो देवा इति त्र्यवसाना पङ्क्तिल्लोमानीत्येका यद्देवा इति तिस्रः समुद्रे ते इति द्विपदाविराडेका द्रुपदादिवमिति तिस्रः समाववर्त्तीत्येकाभ्यादधानीत्यध्यायान्त्यः षड्वृष्टिभ्य उपयामेति यजुर्व्विंशतितमे ऋच्चश्चतुरशीतिर्य्यजूँषि चतुर्दश ८४।१४

एकविंशतितमेऽध्याय इमम्मे व्वरुणेति विंशतिर्ऋचः शेषाणि होता यक्षदित्यारभ्याध्यायान्तानि यजूँषि त्रयस्त्रिंशदृचोऽष्टाविंशतिर्यजूँषि त्रयस्त्रिंशत् २८।३३

द्वाविंशतितमेऽध्याय इमामगृभ्णन्नित्येकायोऽर्वन्तमिति च तत्सवितुरिति दश विश्वोदेवस्येत्येका द्वाविंशे ऋचस्त्रयोदशत्रयोदशोत्तरं शतं यजूँषि १३।११३

त्रयोविंशतितमेऽध्याये हिरण्यगर्भ इत्युत्सक्थ्यावगुदमित्यध्यायान्ताः पञ्चचत्वारिंशत्त्रयोविंश ऋचोऽष्टापञ्चाशद्यजूँषि चतुर्व्विंशतिः ५८।२४

चतुर्विंशतितमेऽध्यायेऽश्वस्तूपर इत्यारभ्याध्यायान्तानि सर्वाणि यजूँषि

पञ्चविंशतितमेऽध्याये शादन्दद्भिरित्यारभ्यत्वचेत्यन्तं सर्वाणि यजूँषि जुम्बकायेति द्विपदा हिरण्यगर्भ इत्यारभ्य हविष्मानित्यन्ताः षट्त्रिंशदृच इमा नु कमिति षड्द्विपदाःपञ्चविंश ऋचस्त्रिचत्वारिंशत् ४३

षड्विंशतितमेऽध्याये प्रियो देवानामित्येकानवसाना बृहस्पतेऽतीत्यध्यायान्ताश्चतुर्विंशतिः षड्विंशे ऋचः पञ्चविंशतिः सप्त यजूँष्यष्टौ यजुरन्ताः २५।१५

सप्तविंशतितमेऽध्याये समास्त्वाग्न इतिदशोद्धास्येति द्वादश पीवोऽन्नानीतिद्वादशाभित्वादश सँवत्सरोऽसीति यजुरेकं सप्तविंशेऋचश्चतुश्चत्वारिंशद्यजुरेकम् ४४।१

अष्टाविंशतितमेऽध्याये होता यक्षदित्यादीनियजूँष्येवं सर्वाणि यजूँषि षट्चत्वारिंशत् ४६

एकोनत्रिंशेऽध्याये समिद्धोऽञ्जन्निति सप्तपञ्चाशदृचाग्नेयः कृष्णग्रीव इत्यारभ्याध्यायान्तानि द्वात्रिंशद्यजूँषि ५७।३२

त्रिंशत्तमेऽध्याये देव सवितरिति तिस्रः पराणि सर्वाण्यध्यायान्तानि सप्तसप्तत्युत्तरं शतं यजूँषि ३।१७७

एकत्रिंशत्तमेऽध्याये सहस्रशीर्षेति द्वाविंशतिर्ऋच एव ।२२

द्वात्रिंशतमेध्याये तदेवाग्निरित्यादयःषोडशर्चस्तत्र तृतीया न तस्य प्पतिमेति द्विपदागायत्री हिरण्यगर्भो यः प्राणतो यस्येमेयात्क्मदा इति चतस्रोमा मा हिंसीदित्येकायस्मान्न जात इति द्वे आपो ह यश्चिदिति द्वे एताः प्रतीको-क्ताः सह पञ्चविंशतिरेव २५

त्रयस्त्रिंशत्तमेऽध्यायेऽस्या जरास इत्याद्यध्यायान्ताः सर्वा ऋच एव द्वाविं-शतिः प्रतीकोक्ताःसहैकोनविंशतिः शतमृच एव ।११९

चतुस्त्रिंशत्तमेऽध्याये यज्जाग्रत इत्येवमादयोऽध्यायपर्यन्ताष्टापञ्चाशदृच एव चतस्रःप्रतीकोक्ताः सह द्वाषष्टिर्ऋच एव ६२

पञ्चत्रिंशत्तमेऽध्यायेऽपेतो यन्त्वित्यादय एकविंशतिर्ऋचो द्युभिरहोभिरित्ये-कं यजुर्व्वायुः पुनात्विति चत्वारि यजूँषि अप न इत्येकमेकविँशदृचः ष-डयजूँषि २१।६

षट्त्रिंशत्तमेऽध्याये यन्म इत्येका तत्सवितुरितिषडिन्द्रो विश्वस्य विराड्द्वि-पदा शन्नोमित्र इति नवाहानिशमिति द्विपदा गायत्री नमस्त इति तिस्रस्त-च्चक्षुरित्येका यजुर्मध्या पुरस्ताद्यजुर्यजुरन्ता षट्त्रिंशे विंशतिर्ऋचो यजूँषि । चैकविँशत्तमेऽध्याये युञ्जत इत्येकाप्रैत्वित्येका धर्ता दिव इति द्वे हृदे त्वे-कासप्तत्रिंशे पञ्चर्चो यजूँषि एकत्रिंशत् ५।३१

अष्टत्रिंशेऽध्याये यस्ते स्तन इत्येका व्विश्वाआशा इत्येकाश्विना घर्ममिति द्वे अभीममिति द्वे गायत्री बृहत्त्यौ मध्येऽनवसानातिशक्वरीवा समस्तत्र्य-वसाना क्षत्रस्यत्वेति चतस्र उद्वयमित्येका यावती द्वे पयसो रेत इति गा-यत्र्यनवसाना चैकत्यष्टत्रिंशे त्रयोदश चतुर्दश वा ऋचो यजूँषि द्वापञ्चाशत् १४।५२

एकोनचत्वारिंशत्तमेऽध्याये मनसः काममित्येकोग्ग्रश्च भीमश्चेति च नवत्रिंश-त्तमे ऋचोद्वे यजुषी सप्तोत्तरशतम् २।१०७

चत्वारिंशत्तमेऽध्याये ईशा व्वास्यमिति चतुर्दशाग्ने नयेति च द्वे इति सप्त-

दशर्चो वायुरनिलमितिद्वे यजुषी ओमिति वा गायत्री क्रतो इति त्रीणि यजूँषि हिरण्मयेन पात्रेणेति वा खम्ब्रह्मेति चत्वारिंशत्तमे यजूँषि सप्त ऋग्यजुषोः संख्याविभागः १७।७

एकीकृता ऋचः सर्वा मुनिषड्वेदभूमिताः १४६७
अब्धिरामाथ वा ज्ञेया वसिष्ठेन च धीमता १

एवं सर्वाणि यजूँषि रामाद्विवसुयुग्मकाः २८२३
अथवा पञ्चभिर्न्यूनाः संहितायां विभागतः २

इति ऋग्यजुःविभागात्मिका वासिष्ठी शिक्षा समाप्ता